# संस्कृत वार्ताः

दिनाङ्क : 10/09/2026 सायम् - 06:20

आदौ मुख्यवार्ताः

- पैरिस-नगरे अन्ताराष्ट्रिय-अन्तरिक्ष-सम्मेलनं सम्बोधितवान् प्रधानमन्त्री नरेन्द्र-मोदी,वैज्ञानिक-तथ्यानाम् उपयोगे पारदर्शितायाः सत्यनिष्ठायाश्च आवश्यकतामपि प्राधान्येन असौ प्रास्तौत् ।
- नवदिल्ल्यां प्रधानमन्त्रिणः नरेन्द्र-मोदिनः लोक-हितैषिणा प्रिन्स-रहीम-आगा-खान-पञ्चमेन सह सञ्जाता मन्त्रणा, अत्रावसरे स्वास्थ्य-रक्षायां, ग्रामीणाभिवृद्धौ, युव-महिला-सशक्तीकरणे च सहभागितायै जातः विचार-विनिमयः ।
- मातृ-शिशु-कल्याण-क्षेत्रे अथ असंचारी-रोगाणां नियन्त्रणे भारतस्य अभूतपूर्व-स्वास्थ्योपलब्धीः भूरिशः प्राशंसयत् विश्व-स्वास्थ्य-सङ्गठनस्य महानिदेशकः डॉ.टेड्रोस्-अधनोम-घेब्रेसस इत्यसौ ।
- अद्य ओडिशा-राज्ये तीव्रात् अति-तीव्र-वृष्ट्यै ऋतु-विज्ञान-विभागेन रक्त-सञ्चेतना प्रख्यापिता ।
- महिला-एशिया-चषक-प्रतियोगितायाः उपान्त्य-चक्रे भारतीय-दलं दुबई-नगरे अद्य सायं बाङ्गलादेश-दलेन सह प्रतिस्पर्धिष्यति।

---

प्रधानमन्त्री-अन्तरिक्षसम्मेलनम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना उद्घोषितं यत् भारतम् अन्ताराष्ट्रिय-विधेः, संवादस्य, बहुपक्षीय-सहयोगस्य च आधारेण सुरक्षितस्य, शान्तिपूर्णस्य, शाश्वतस्य च अन्तरिक्ष-मण्डलस्य दृढं समर्थनं विधत्ते। सः अवोचत् यत् वैज्ञानिक-तथ्यानि पारदर्शि-सत्यनिष्ठतया समग्र-लोककल्याणाय विनियुक्तानि भवेयुः। प्रधानमन्त्री फ्रान्स-देशस्य पैरिस-नगरे आयोजिते अन्ताराष्ट्रिय-अन्तरिक्ष-सम्मेलने आभासीय-माध्यमेन सम्बोधयन् एतत् प्रतिपादितवान्।

प्रधानमन्त्रिणा सबलं प्रोक्तं यत् अन्तरिक्ष-कक्षासु सम्मर्दवृद्ध्या सह सङ्घर्ष-स्थाने सहयोगः, अल्पकालिक-लाभानां स्थाने शाश्वतता, बहिष्करण-स्थाने च समावेशिता एव प्राथम्यं भजेरन्।

श्रीमोदिना स्पष्टीकृतं यत् भारतस्य अन्तरिक्ष-यात्रा अस्यैव तत्त्वज्ञानस्य प्रतीकभूता वर्तते। शताब्देभ्यः अन्तरिक्षम् अस्माकं कल्पनां प्रेरयति स्म, अद्य च तत् जलवायु-सस्यादिभ्यः आरभ्य सागरान् जन-समुदायांश्च यावत् पृथिव्यां मानव-जीवनं परिष्करोति। भारतस्य अन्तरिक्ष-उपलब्धीः प्रतिपादयन् प्रधानमन्त्री अवोचत् यत् चन्द्रयान-तृतीयाभियानेन भारतं चन्द्रस्य दक्षिण-ध्रुव-समीपे अवतरणं कुर्वाणं विश्वस्य प्रथमं राष्ट्रम् अभवत्, आदित्य-एल्-प्रथमाभियानं च सूर्यस्य रहस्यानि उद्घाटयति। गतवर्षे एकः भारतीयः अन्ताराष्ट्रिय-अन्तरिक्ष-स्थानकं गतवान्। सः अग्रे अवोचत् यत् भारतस्य लक्ष्यं पञ्चत्रिंशदुत्तर-द्विसहस्रवर्षं यावत् भारतीय-अन्तरिक्ष-स्थानकस्य प्रतिष्ठापनं, चत्वारिंशदुत्तर-द्विसहस्रतमवर्षं यावच्च चन्द्रमसि भारतीयस्य प्रेषणमिति वर्तते । अस्य लाभश्च समग्रां मानवजातिं प्राप्नुयात् इति भारतस्य मार्गदर्शक-सिद्धान्तः। इसरो-संस्थायाः भूमिकां प्रशंसन् प्रधानमन्त्री अवोचत् यत् स्वकीयया कार्य-दक्षतया मितव्ययि-अभियानैश्च इसरो-संस्थया वैश्विक-प्रशंसा अर्जिता। अस्याः तन्त्रज्ञानं कृषकाणां, धीवराणां, ऋतु-पूर्वानुमानस्य, आपद्प्रबन्धनस्य, नौवहनस्य च सेवां करोति, अद्यावधि-पर्यन्तं चतुस्त्रिंशत्-देशानां त्रिंशदधिक-चतुश्शतादधिकाः उपग्रहाः भारतीय-प्रक्षेपण-यानैः अन्तरिक्षं प्रेषिताः।

---------------------------------------------------------

## प्रधानमन्त्री-रहीमआगाखान

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां विश्रुतेन इस्माइली-समुदायस्य पञ्चाशत्तमेन इमाम-प्रिन्स-रहीम-आगा-खान-पञ्चमेन सह सौहार्दपूर्णां मन्त्रणां अकरोत्।सामाजिक-सञ्चार-पटलीय-सन्देशे प्रधानमन्त्रिणा मोदिना दिवङ्गतः आगा-खान-चतुर्थः विकास-क्षेत्रे तस्य चिरस्थायि-योगदानं सस्नेहं संस्मृतम्। प्रधानमन्त्रिणा निरुपितं यत् ताभ्यां स्वास्थ्य-रक्षायां, कृषौ, ग्रामीणाभिवृद्धौ, अथ च युव-महिला-सशक्तीकरणे आगा-खान-विकास-तन्त्रेण सह भारतस्य सहभागितां सुदृढीकर्तुं सम्भाव्य-उपायेषु चर्चा विहिता। अपरत्र, विदेशमन्त्री डॉ. एस. जयशङ्करोऽपि प्रख्यातं लोक-हितैषिणं अमिलत्। प्रिन्स-रहीम-आगा-खान-पञ्चमः अस्य मासस्य पञ्चदश-दिनाङ्कं यावत् भारत-यात्रायां स्थास्यति।

---

<u>दिल्ली-ब्रिक्सादेशः</u>

शनिवासरात् आरभ्यमाणस्य द्विदिवसीयस्य ब्रिक्स-शिखर-सम्मेलनस्य पूर्व-सिद्धतायाः अङ्गत्वेन, सुरक्षा-चिन्तां वीक्ष्य, दिल्ली-आरक्षि-दलेन अद्य राष्ट्रिय-राजधान्यां सोमवासरं यावत् ड्रोन्स इत्येतेषां अथ च अन्येषां लघु-वायव्य-मञ्चानां सञ्चालने पूर्ण-प्रतिबन्धः स्थापितः। दिल्ली-आरक्षि-आयुक्तः अनुराग-कुमारः शिखर-सम्मेलनस्य सुरक्षा-व्यवस्थायाः सुदृढीकरणार्थम् एतं निषेधादेशं प्रख्यापितवान्।आरक्षि-दलेन स्पष्टीकृतं यत् गुप्त-सूचनाधारेण एषः निर्णयः गृहीतः। गुप्तसूचनानुसारं समाज-कण्टकाः आतङ्कवादि-समूहाः वा अवसरेऽस्मिन् जन-सुरक्षायाः, अतिविशिष्ट-व्यक्तीनां, महत्त्वपूर्ण-सर्वकारीय-प्रतिष्ठानानां च कृते सङ्कटम् उत्पादयितुम् एतादृशानां व्योम-मञ्चानां दुरुपयोगं कर्तुं शक्नुवन्ति।

---

<u>डब्ल्यूएचओ-नड्डा</u>

विश्व-स्वास्थ्य-सङ्गठनस्य महा-निदेशकः डॉ. टेड्रोस्-अधनोम-घेब्रेसस इत्यसौ केन्द्रीय-स्वास्थ्य-मन्त्रिणं जे.पी.नड्डा-महोदयम् अद्य अमिलत् । एतत् मेलनम् तैमोर-लेस्ते-देशे आयोजितायाः विश्व-स्वास्थ्य-सङ्गठनस्य दक्षिण-पूर्व-एशिया-क्षेत्रीय-समित्याः एकोनाशीतितम-सत्रावसरे सञ्जातम्। अवसरेऽस्मिन् डॉ.टेड्रोस इत्यमुना स्वास्थ्य-क्षेत्रे विशेषतः मातृ-शिशु-कल्याण-दिशि, अथ च असंचारी-रोगाणां विरुद्धं सञ्चालिते अभियाने भारतस्य उल्लेखनीय-उपलब्धीनां कृते श्रीनड्डाय अभिनन्दनानि व्याहृतानि। डब्ल्यू.एच.ओ.-प्रमुखेण निरुपितं यत् भारते षष्टिसहस्राधिकैकलक्ष-सङ्ख्यकैः आयुष्मान्-आरोग्य-मन्दिरैः जन-सामान्यस्य समीपं उच्च-रक्तचापस्य, मधुमेहस्य, सामान्य-कर्करोगाणां च प्रारम्भिक-परीक्षणानां व्यवस्था प्रापिता, सहैव अग्रिम-उपचारार्थं सुगम-प्रेषण-मार्गाः कल्पिताः सन्ति।

---

<u>शिवराज-उपवेशनम्</u>

केन्द्रीय-कृषि-कृषक-कल्याणमन्त्री शिवराजसिंह-चौहानः मलेशिया-तैमोर-लेस्ते-म्यानमार-देशानां स्व-समकक्षैः सह उच्च-स्तरीयोपवेशनम् अकरोत्। एताः मन्त्रणाः ह्यः नवदिल्ल्यां समनुष्ठितायाः कृषि-वानिकी-विषयिण्याः नवम-आसियान-भारत-मन्त्रि-स्तरीय-सङ्गोष्ठ्याः अवसरे सम्पन्नाः। मलेशिया-देशस्य कृषि-खाद्य-सुरक्षा-मन्त्रिणा मोहम्मद-बिन-साबू इत्यनेन सह सम्भाषणे श्रीचौहानेन ज्ञानस्य, कार्य-दक्षतायाः, उत्कृष्ट-पद्धतीनां च परस्पर-आदान-प्रदानस्य महत्त्वं प्रतिपादितम्। केन्द्रीय-मन्त्रिणा संयुक्त-कृषि-अनुसन्धाने, तन्त्रज्ञाने, नवीनोन्मेषे च सहयोगं दृढीकर्तुं रुचिः प्रदर्शिता।

अपरत्र, श्रीचौहानः म्यानमार-देशस्य कृषि-मन्त्रिणा मिन-नाउंग इत्यमुना सहापि विचार-विनिमयमकरोत्। मेलनेऽस्मिन् केन्द्रीय-मन्त्रिणा निरुपितं यत् उभयोः देशयोः मध्ये कृषौ तत्सम्बद्ध-क्षेत्रेषु च सहकार्य-संवर्धनाय प्रस्तूयमानं सहमति-पत्रं अन्तिम-रूप-स्वीकरणस्य प्रौढ-चरणे वर्तते।

--------------------------------------------------------

**ऋतुविभागः**

भारत-ऋतु-विज्ञान-विभागेन अद्य ओडिशा-राज्ये क्वचित् अतितीव्रवृष्टेः, क्वचिच्च अतितीव्रतरवृष्टेः रक्तवर्णीया सञ्चेतना प्रख्यापिता। ऋतु-विज्ञान-विभागेश आगामिनि त्रि-चतुर्दिनेषु असम-मेघालय-नागालैण्ड्-मणिपुर-मिज़ोरम-त्रिपुरा-राज्येषु, अथ च गङ्गा-तटीय-पश्चिमबङ्गाले, बिहारे, झारखण्ड-राज्ये च प्रबलवृष्टेः पूर्वानुमानं प्रकटितम् ।

--------------------------------------------------------

**क्रीकेट-क्रीडा**

महिलानां क्रिकेट्-क्रीडायाम् एशिया-चषक-स्पर्धायाः उपान्त्य-चक्रे अद्य दुबई-नगरे भारतस्य बाङ्गलादेश-दलेन सह प्रतिस्पर्धा भविष्यति। इयं प्रतिस्पर्धा भारतीय-मानक-समयानुसारं रात्रौ अष्ट-वादने समारप्स्यते। प्रतियोगितायाम् अस्यां भारतीय-दलं एतावता अपराजितमेव राजते ।

।। इति वार्ता: ।।